इति कुमारसम्भवे ।) शेखरः । शिरोभूषणं । तत्पर्य्यायः । वतंसः २ उत्तंसः ३ । इत्यमरः ॥ मुकुटं ४ मकुटं ५ मौलिः ६ मौलीकः ७ शेखरं ८ उष्णीषकः ९ कोटीरकं १० कोटीरं ११ किरीटं १२ चूड़ामणिः १३ शिरोरत्नं १४ शिरोमणिः १५ । कर्णभूषणं । तत्पर्य्यायः । वतंसः २ कर्णपूरः ३ कुण्डलं ४ कर्णवेष्टनं ५ उत्तंसः ६ दन्तपत्रं ७ कर्णकं ८ । इति शब्दरत्नावली ॥

अवतमसं, क्ली, (अवततं व्याप्तं तमः, प्रादिसमासः, अच् ।) अल्पान्धकारः । इत्यमरः ॥

("अवतमसभिदायै भास्वताभ्युद्गमेन
प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्तः" ।

इति माघः ।)

अवतारः, पुं, (अव + तॄ + करणे घञ् ।) अवतरणं । पुष्करिण्यादिः । तीर्थः । इति मेदिनी ॥ (सोपानपद्धतिः । प्रस्तावना । आभासः । उपक्रमणिका । यथा । "दूरे गुणप्रथितवस्तुकथावतारः" । इति शान्तिशतके ।) देवानां विशेषतो विष्णोर्मर्त्यन्तरेण पूर्णांशावेशरूपेण पृथिव्यामवतरणं । अवतारास्त्वसंख्येयाः तेष्वेते प्रसिद्धाः । ब्रह्मा १ वराहः २ नारदः ३ नरनारायणौ ४ कपिलः ५ दत्तात्रेयः ६ यज्ञः ७ ऋषभदेवः ८ पृथुः ९ मत्स्यः १० कूर्म्मः ११ धन्वन्तरिः १२ मोहिनी १३ नृसिंहः १४ वामनः १५ परशुरामः १६ वेदव्यासः १७ रामः १८ बलरामः १९ कृष्णः २० बुद्धः २१ कल्की २२ । इति श्रीभागवते ॥ यथा,—

"सएव प्रथमं देवः कौमारं सर्गमाश्रितः ।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितं ॥
द्वितीयन्तु भवायास्य रसातलगतां महीं ।
उद्धरिष्यन्नुपादत्त यज्ञेशः शौकरं वपुः ॥
तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः ।
तन्त्रं सात्वतमाचष्ट नैष्कर्म्म्यं कर्म्मणां यतः ॥
तुर्य्ये धर्म्मकला सर्गे नरनारायणावृषी ।
भूत्वात्मोपशमोपेतमकरोद्दुश्चरं तपः ॥
पञ्चमः कपिलोनाम सिद्धेशः कालविप्लुतं ।
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयं ॥
षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ।
आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥
ततः सप्तम आकूत्यां रुचेर्य्यज्ञोऽभ्यजायत ।
स यामाद्यैः सुरगणैरपात् स्वायम्भुवान्तरं ॥
अष्टमे मेरुदेव्यान्तु नाभेर्जात उरुक्रमः ।
दर्शयन् वर्त्म धीराणां सर्व्वाश्रमनमस्कृतं ॥
ऋषिभिर्य्याचितो भेजे नवमं पार्थिवं वपुः ।
दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः ॥
रूपं स जगृहे मात्स्यं चाक्षुषोदधिसंप्लवे ।
नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुं ॥
सुरासुराणामुदधिं मथ्नतां मन्दराचलं ।
दध्रे कमठरूपेण पृष्ठ एकादशे विभुः ॥
धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया ॥
चतुर्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्जितं ।
ददार करजैरूरावेरकां कटकृद्यथा ।
पञ्चदशं वामनकं कृत्वागादध्वरं बलेः ।
पदत्रयं याचमानः प्रत्यादित्सुस्त्रिपिष्टपं ॥
अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीं ॥
ततः सप्तदशे जातः सत्यवत्यां पराशरात् ।
चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः ॥
नरदेवत्वमापन्नः सुरकार्य्यचिकीर्षया ।
समुद्रनिग्रहादीनि चक्रे वीर्य्याण्यतः परं ॥
एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरत् भरं ॥
ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ।
बुद्धोनाम्नाञ्जनसुतः कीकटेषु भविष्यति ॥
अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु ।
जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥
अवतारा ह्यसंख्येया हरेः सत्वनिधेर्द्विजाः ।
यथा विदासिनः कुल्याः सरसःस्युः सहस्रशः ॥
ऋषयो मनवो देवा मनुपुत्रा महौजसः ।
कलाः सर्व्वे हरेरेव सप्रजापतयः स्मृताः ॥
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयं ।
इन्द्रारिव्याकुलं लोकं मृड़यन्ति युगे युगे" ॥

इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥ (दशअवतारा एव प्रधानतया प्रसिद्धाः । ते च यथा,— "मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः । रामो रामश्च रामश्च बुद्धः कल्की च ते दश" ॥) (आविर्भावः । जन्म । उत्पत्तिः । यथा,—

"अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम्" ।

इति रघुः । अपसारणं । हरणं । यथा,—

"भूमेर्भारावताराय ब्रह्मणाप्रार्थितः पुरा ।
स एव जातो भवने कौशल्यायां तवानघ" ॥

इति अध्यात्मरामायणे ।

अवतारणं, क्ली, (अव + तॄ + णिच् + ल्युट् ।) भूतादिग्रहः । वस्त्राञ्चलं । अर्च्चनं । इति विश्वमेदिन्यौ ॥ (ग्रन्थप्रस्तावना । ऊर्द्धादध आनयनं । यथा,— "क्रियतां यदि शक्नोषि गङ्गाया अवतारणं" । इति रामायणे ।)

अवतीर्णः, त्रि, (अव + तॄ + कर्त्तरि क्तः ।) अवतरणविशिष्टः । प्रादुर्भूतः । जलादौ कृतावरोहः । यथा । ज्योतिषे ।

"नीलग्रीव शुभग्रीव सर्व्वकामफलप्रद ।
पृथिव्यामवतीर्णोऽसि खञ्जरीट नमोऽस्तु ते" ॥

इति तिथ्यादितत्त्वं ॥

अवतोका, स्त्री, (अवपतितं तोकमस्याः सा ।) पतद्गर्भा गौः । तत्पर्य्यायः । स्रवद्गर्भा २ । इत्यमरः ॥ गावड़ागाइ । गावफेला गाइ । इति भाषा ॥

अवदंश, पुं, (अव + दन्श + घञ् ।) सुरापानरुचिजनकचर्व्वणद्रव्यं । गजक इति भाषा । तत्पर्य्यायः । भक्षणं २ । इत्यमरः । विदंशः ३ सन्धानं ४ रोचकः ५ । इति राजनिर्घण्टः ॥

अवदातः, पुं, (अव + दै + क्तः ।) श्वेतवर्णः । पीतवर्णः । इत्यमरः ॥

अवदातं, त्रि, (अव + दै + क्तः ।) शुक्लगुणविशिष्टं । ("कुन्दैः सविभ्रमवधूहसितावदातैः" ॥ इति ऋतुसंहारे । पीतवर्णयुक्तं । निर्म्मलं ।

"तत्त्वं क्रमेण विदुषां करुणावदाते
श्रद्धावतां हृदि पदं स्वयमादधाति" ।

इति शान्तिशतके ।) मनोज्ञं । इत्यमरहेमचन्द्रौ ॥

अवदानं, क्ली, (अव + दो + ल्युट् ।) वृत्तं कर्म्म । प्रशस्तमथच निर्व्यूढं कर्म्म । ये कर्म्मे प्रवृत्तिते सकले प्रशंसा करे सेइ समाप्तकर्म्म इति भाषा । तत्पर्य्यायः । अपदानं २ । इत्यमरः तट्टीका च । खण्डनं । इति मेदिनी ॥

("विश्वावसुप्राग्रहरैः प्रवीणैः
सङ्गीयमानत्रिपुरावदानः" ।

इति कुमारसम्भवे ।) वीरणमूलमिति स्वामी ॥ (पराक्रमः । वीर्य्यं । यथा,—

"नैरृतघ्नमथ मन्त्रवन्मुनेः
प्रापदस्त्रमवदानतोषितात्" ।

इति रघुवंशे ।)

अवदारणं, क्ली, (अवदीर्यतेऽनेन, अव + दॄ + णिच् करणे ल्युट् ।) खनित्रं । खन्ता इति ख्यातं । इत्यमरः ॥ (विदारणं । भेदनं । खननं । यथा,— "अवदारणकाले तु पृथिवी नावदीर्य्यते" । इति रामायणे । अव + दॄ + भावे ल्युट् ।)

अवदाहं, क्ली, (अवशमितोदाहो येन तत् ।) वीरणमूलं । इत्यमरः ॥ (उशीरशब्देऽस्य विशेषो ज्ञेयः ।)

अवदाहेष्टं, क्ली, (अवदाहे इष्टम् अनुकूलम् ।) वीरणमूलं । इत्यमरटीकायां भरतादयः ॥

अवदाहेष्टकापथं, क्ली, उशीरं । खस् इति भाषा ।) इति भरतः ॥

अवदीर्णं, त्रि, (अव + दॄ + क्त ।) द्रवीभूतघृतादि । तत्पर्य्यायः । द्रुतं २ । इत्यमरः ॥

अवदोहः, पुं, (अव + दुह + घञ् ।) दुग्धं । इति त्रिकाण्डशेषः ॥

अवद्यं, त्रि, (न वदति परं गुणं, अवद्यावमाधमार्व्वरेफाः कुत्सिते इति वदेर्नञि कर्त्तरि यत् ।) अधमं । कुत्सितं । गर्हितं । निकृष्टं । इत्यमरः ॥

अवद्यं, क्ली, अनिष्टं । इति वोपदेवः ॥ पापं । इति पाणिनिः ॥("उदवहदनवद्यां तामवद्यादपेतः" । इति रघुवंशे ।)

अवधानं, क्ली, (अव + धा + ल्युट् ।) मनोयोगः । तत्पर्य्यायः । समाधानं २ प्रणिधानं ३ समाधिः ४ । इति हेमचन्द्रः ॥

अवधारणं, क्ली, (अव + धृ + णिच् + ल्युट् ।) निश्चयः । यथा । "हि हेतावधारणे" । इत्यमरः ॥

अवधारितः, त्रि, (अव + धृ + णिच् + क्त ।)कृतावधारणः । यथा ।

"त्वया सुमुखि किं प्रोक्तं न मया ह्यवधारितं ।
विवेचय महाभागे सङ्केतो वर्त्तते खलु" ॥

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २० अध्यायः ॥

अवधार्य्यः, त्रि, (अव + धृ + ण्यत् ।) अवधारणीयः । अवपूर्व्वकधृधातोर्ण्यण् प्रत्ययेन निष्पन्नः । निर्धार्य्यः ॥